)) श्लोकसंख्या ३५० ॥ तथा पाना संख्या १६ ॥

॥ ०॥ श्लोकसंख्या २४०

पात्रसंख्या १६ भगवानलालईद्र

ग्रन्थ संपूर्ण

श्रीगणेशायनमः। ॐ वेगिणेशंरविचंद्रराहून्नत्वापटेचंद्रविग्रहोक्तं। सुसंप्रदायाद्वि
नक्रमंतंप्राप्नोतियेनग्रहविप्रतिष्ठां॥१॥ सारासारनरंगृह्यसर्वशास्त्रसमूहतः। ज्योतिर्विदा
हितार्थायनिर्बंधःक्रियतेमया॥२॥ सर्वस्यैवहिशास्त्रस्यकर्मणोवापिकस्यचित्। यावत्प्रयो
जनंनोक्तंतावत्तेननदृश्यते॥३॥ ज्योतिःशास्त्रंमहापुण्यंचंद्रार्कौयिसमाश्रितौ। यस्य
ज्ञानंसौयातिनिवासूर्यस्यमंडलं॥४॥ वेदास्तावद्यज्ञकर्मप्रवृत्ताःयज्ञाःप्रोक्तास्तेतुकाला
श्रयेण। शास्त्रादस्मात्कालबोधोयतःस्याद्वेदांगत्वंज्योतिषस्योक्तमस्मात्॥५॥ तस्माद्वि
जैरध्ययनीयमेतत्पुण्यंपवित्रंपरमंरहस्यं। योज्योतिषंवेत्तिनरःससम्यक्धर्मार्थमो
क्षान्लभतेयशश्च॥६॥ विद्यापुराणस्मृतयोपराणितर्कादिशास्त्राणितथेतिहासाः। वि
वादरूपाण्यखिलानितेषांसत्याधिकंज्योतिषमागमांग॥७॥ बहुफलंजपदानहुतादि
फलंस्मृतिपुराणविदःप्रवदंतिहासहुपकारिजनेचचमत्कृतिग्रहणमिंद्विनयोःप्रवदंतम
तः॥९॥ सिंहिकासुतशिरःसुदर्शनिछिन्नमप्यमृतवस्तुशक्तितः। अप्रमुक्तमसुभिः

ग्रहोराहुमाहुरितिकेपिसूरयः॥९॥ चंद्रचंडकरमंडलाकृतिर्व्योम्निमेचकतयानलक्ष्य
ते। केचिदूचुरपरत्रपर्वणिःसंधिसंभववरप्रदानतः॥१०॥ आननप्रुछविनक्रशरीरंकेचन
कपिनुजंगमरूपं। दृष्यनषट्कसमायतकोयंतंप्रवदंतितमोमयमन्ये॥११॥ राहुःपुराणे
असुरोत्तमांगंभुजंगरूपंवरशास्त्रकाराः। तमिश्ररूपंजगदुर्ग्रहज्ञाःस्वरूपभेदोस्त्युक्ता
र्थभेदात्॥१२॥ राहुःकृतामंडलगःशशांकंशशांकगोःछादयतीनबिंबं॥ तमोमयःशं
भुवरप्रदानात्सर्वगिमानामविरुद्धमेतत्॥१३॥ दिग्देशकालावरणादिभेदैर्नछाद
यतीतिराहुरितिब्रुवंति। यन्मानिनःकेवलगोलविद्यास्तत्संहितावेदपुराणबाह्यं॥१४॥
तत्वदृष्टाकोभुवनत्रयस्यखगस्थितिध्वंसविधोविधाता। तेनापिमूर्ध्नाधृतमिं
दुमध्यास्तथापिमूढानवदंतिराहुं॥१५॥ राहुनीब्रतपसापरितुष्टोदत्तेवानितिविधि
व[illegible]रम्मे। होमदानविधिनातवतृप्तिस्तिग्मशीतनपसोरुपरागे॥१६॥ योसावसुरोरा
त्रेरल्पवरोब्रह्मणपुरादत्तः। आप्यायनमुपरागेदत्तहुतांशेनतेनभविता॥१७॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

नेत्र एलिखनानुक्रमेउपोद्घातग्रहणकथनाधिकारःप्रथमः॥ ॥अथग्रहणपटलि
खनक्रमः॥ ॥स्वस्तिश्रीजयोमंगलाभ्युदयश्च॥अलाच्युतेशगणनाथगिरःप्रणम्य
गोमऊरून्दिनकरादिखगान्द्विजांश्च।सिद्धांततंत्रकरणानिनिरीक्ष्यतेभ्योदृष्टंस्फुटं
ग्रहणमत्रवदामिपुण्यं॥१॥दूतोनसंचरतिखेनचलेषवात्रपूर्वंनजल्पितमिदंनचसं
शयोस्ति।व्योम्निस्थितंहिमकरग्रहणंरवेवजानातियोद्विजवरःसकथंनदेवः॥२॥प्र
णम्यपूर्वंशिरसाप्रजापतिंहरिंहरंविघ्नहरंसरस्वतीं।सूर्यादिखेटान्ससुरान्द्विजोत्तमां
स्ततोब्रवीमिग्रहणंहिमांशोः।सूर्यग्रहणेखरांशोरिति॥३॥नेक्षेतग्रहणंशिवायगगा
निप्रोक्तंमुनींद्रैर्यतस्तस्माद्रूपनिभिःपटेविलिखितंवीक्ष्यंविधोर्वारिवैः।श्रेयस्कारि
लापहंबहुगुणंमांगल्यपुष्टिप्रदंश्रोतव्यंसततंनृभिर्द्विजमुखाद्भव्यंभवेत्श्रद्धया॥
॥४॥गंगागयापुष्करनैमिषेषुस्नानोपवासामरदृजनाद्यैः।यत्प्राप्यतेपुण्यफलं २
नराणांतत्स्पष्टएषतांस्याद्ग्रहणंरवींद्वोः॥५॥अलिकुलदलनीलःकोकिलामेचकाभ

तजलजलदवर्णोविद्युतवैडूर्यकांतिः।चलतिचरणहीनोमूर्द्धरूपःखगोसौविधुतपनवि
मर्द्दीपाशुवःसैंहिकेयः॥६॥भिन्नांजनाभःकिलमंजुलाभ्रनिर्वरप्रदानात्कमलासनस्य।
बिंबंप्रविष्टःशशिसूर्ययोर्जनैःप्रदृश्यतेपाशुसवोविधुंतुदः॥७॥अथचंद्रग्रहणे।अमृ
तमयशरीरःसागरानंदहेतुःकुमुदवनविकाशीरोहिणीजीवितेशः।मनसिजनिजबंधु
मानिनीमानमाथीनवशुशिवकरोवश्चंद्रमाःपर्वकाले॥८॥कृष्णाणामधिपःसुशीतलक
रःसर्वौषधीनांपतिर्लोकानांनयनानुरागजननोरुद्रेणमूर्द्धध्रितः।सुस्निग्धांजनतेजसौ
सान्निध्येनवपुषायश्छाद्यतेराहुणासोयंवोविदधाशुशीतकिरणोलक्ष्मीमनोवांछितां।
॥९॥अवशुवःस्फटिकांजनसंनिभोतेजसोविधुविधुंतुदयोर्युतिर्बरे।जगदधोघ
विघातविधायिनीसुरसरिद्यमुनाजलयोरिव॥१०॥अथश्रीसूर्यग्रहणेआशिषः।नि
लांजनाभः॥११॥ग्रस्तंचराचरमिदंतमसानिशायामाविध्यतत्प्रभुकरैर्विधुनोतिनित्यं।त
द्वैरजस्तमसांधतमोमयेनयोगेद्यतेससततंसविनावतात्वः॥१२॥पाणिनाधानरु

चादनुजारेर्यसुदर्शनमिवप्रतिभाति।यद्गुणकवैलितंरविबिंबंतत्करोतुभवतामघना
शं॥१३॥इतिसूर्यग्रहणे।अथग्रहणश्रवणानुक्रमः।सर्वसृष्टेःप्रक्रमःपार्थिवानांवंशास्त
स्मात्पर्वणोव्योग्निरस्मात्।तस्माद्दानस्नानतीर्थप्रभावादप्यर्द्धेद्वोःपंचधाश्रावयेत्र
॥१४॥आयुःसृष्ट्याराजवंशेनशौर्यंपिर्वव्यक्त्यावर्द्धनेपुण्यराशिः।दानैःश्रद्धास्पर्शमोक्षा
दिभेदैःश्रौतस्मार्तंवैकृतंनाशमेति॥१५॥अथसृष्ट्यनुक्रमः।आसीदिदंतमोभूतमप्रज्ञा
तमलक्षणं।अप्रतर्क्यमविज्ञेयंप्रसुप्तमिवसर्वतः॥१६॥ततःस्वयंभूर्भगवानव्यक्तोव्यंजय
न्निदं।महाभूतादिवृत्तौजाःप्रादुरासीत्तमोनुदः॥१७॥योसावतीद्रियोग्राह्यःसूक्ष्मोव्यक्त
सनातनः।सर्वभूतमयोचिंत्यःसएवपुरुषःपरः॥२॥सोभिध्यायशरीरात्स्वात्सिसृक्षुर्वि
विधाःप्रजाः।आपएवससर्जादौतासुवीर्यमवासृजत्॥३॥तदंडमभवद्धैमंसहस्रांशुसम
प्रभं।तस्मिन्जज्ञेस्वयंब्रह्मासर्वलोकपितामहः॥४॥आयोनाराइतिप्रोक्ताआपोवै
नरसूनवः।नरास्तस्यायनंपूर्वंतेनेनारायणःस्मृतः॥५॥यत्तत्कारणमव्यक्तंनित्यं

सदसदात्मकं।तद्विसृष्टःसपुरुषोलोकेब्रह्मेतिकीर्त्यते॥६॥तस्मिन्नंडेसभगवानुषित्वा
परिवत्सरं।अयमेवात्मनोध्यानात्तदंडमकरोद्द्विधा॥७॥ताभ्यांससकलान्यांदिवंभूमिंच
निर्ममे।अंतरिक्षंदिशश्चाष्टावपांस्थानंचशाश्वतं॥८॥अंडमध्येतुजातानिभुवनानिचतु
र्दश।भूर्लोकोथभुवर्लोकःस्वर्लोकश्चमहस्तथा॥९॥जनलोकस्तपःसत्यंब्रह्मणस्तदनंत
रं॥१०॥एतेलोकाः।तलंचवितलंचैवनितलंप्रतलंतथा।सुतलंमहातलंचसप्तमंस्यात्रसा
तलं॥११॥अथचतुर्दशभुवनानांमध्यात्भूमेःप्रमाणं।कोटिद्वयंत्रिपंचाशल्लक्षाणिचत
तःपरं।पंचाशच्चसहस्राणिसप्तद्वीपाःससागराः॥१२॥ततोहेममयीभूमिर्दशकोट्योवरानने।
देवानांक्रीडनार्थायलोकालोकस्ततःपरं॥१३॥सर्वतोवलयाकारायोजनायुतविस्तरा
अस्यबाह्येतमोघोरंदुःप्रेक्ष्यंजीववर्जितं॥१४॥इतिब्रह्मांडोत्पत्तिः।एवंश्रीविष्णोर्देहे
एकस्मिन्रोमकूपेब्रह्माडकोटयोभ्रमंति॥१५॥अथब्रह्मायुःप्रमाणंकथ्यते।तत्रादौ
तत्रैवर्षमानेनयुगेप्रमाणं।कृतयुगप्रमाणं१७२८००० त्रेतायुतप्रमाणं१२९६००० द्वापर

युगप्रमाणं।८६४०००कलियुगप्रमाणं४३२०००एतेदिव्ययुगचरणाः।एकेदिव्ययुगं४
३२००००मन्वंतरंतुदिव्यानांयुगानामेकसप्ततिः।७१एवंमन्वंतर१४मन्वंतरनोदिवस१
तेकल्पहोए।तावतीरात्रिः।कृतयुगप्रमाणसंधिः७२८०००एवंसंधिः।१५एवंदिव्ययुग
सहस्र१मन्वंतर१४तेब्रह्मानोदिवस१तेकल्पहोएतावतीरात्रिः।अहोरात्रिकल्प२अनेन
अहोरात्रिमानेनब्रह्मणः मासऋतुअयनवर्षाणिमापिसाधनं।एवंब्रह्माशतवर्षायुः
समहाकल्पः।स्वस्तिश्रीपरमेश्वरे दाणवशास्त्रस्याज्ञयावर्तितधाऊःसंप्रतिचायुषोपर
दत्तेत्याद्याद्भिरवर्द्धिके।कल्पेश्वेतवराहनामनिमनौवैवस्वतेसप्तमेष्टाविंशेद्यकलौतदा
द्याचरणेशाकेतृतीयेधुना॥१॥यातषण्मनवोयुगानिनमिताऽन्ययुगांद्रित्रयंनंदाद्रि
ऋणा३१७२स्तथाशकनृपस्यांतेकलेर्वसराः।गोद्रींद्रद्रितुकदस्रनगोचंद्राःशका
१८७२९४७१७२क्षान्विताःसर्वेसंकलिताःपितामहदिनेस्युर्वर्त्तमानेगताः।।२।।स्वायंभुवो ४
मनुरुत्प्रथमस्ततोमीस्वारोचिषोत्तमजतामसरैवतश्च।षष्ठस्तुचाक्षुषइतिप्रथितः

पृथिव्यां वैवस्वतस्तदनुसंप्रतिसप्तमोयं॥३॥कृतंत्रेतायुगंचैवद्वापरंचकलिस्तथा।युगा
न्येतानिचत्वारिभवंतिचपुनःपुनः॥४॥लक्षैःसप्तदशाख्यैस्तुवसराणांप्रकीर्त्तितं।अष्टाविंश
सहस्रैस्तुवसराणांकृतंयुगं॥५॥त्रेताद्वादशभिर्लक्षैर्वर्षाणांप्रकीर्त्तितं।षण्णवत्यासहस्रै
स्तुद्वितीयंयुगमुत्तमं॥६॥वर्षाणामष्टभिर्लक्षैर्द्वापरंयुगमीरितं।चतुःषष्ट्यासहस्रैस्तृ
तीयंतुपुराणैः॥७॥ततःकलियुगंप्रोक्तंलक्षचत्वार एवहि।द्वात्रिंशच्चसहस्राणियुगस्यै
वांतिमस्यच॥८॥चत्वारिंशत्तथात्रीणिलक्षाणिसर्वसंख्यया।सविंशतिसहस्राणिदिव्यं
युगमुदाहृतं॥९॥मन्वंतरंतुदिव्यानांयुगानामेकसप्ततिः।७१ससंधयस्तेमनवःकल्पेज्ञे
याश्चतुर्दश॥१०॥कृतप्रमाणस्तस्यादौसंधिःपंचदशस्मृता।कृताष्टसंख्यास्तस्यांतेसंधि
प्रोक्तोजलप्लवः॥११॥इत्थंयुगसहस्रेणभूतसंहारकारकः।कल्पोब्राह्ममहःप्रोक्तंश
र्वरीतस्यतावती॥१२॥चतुर्दशसहस्राख्याजायंतेतत्रवासरे।परमायुःशतंतस्यतथारा
त्रसंख्यया॥ब्रह्मणःशतवर्षैश्चमहाकल्पःप्रकीर्त्तितः॥१३॥मनुप्रमाणं।कोटि०

लक्षा६ सहस्र२० संधिलक्षा१ सहस्र८ ब्रह्मणोदिनप्रमाणं अज्ञ४ अर्बुद३ कोटि८ अयंक
ल्पः। तावतीरात्रिः। अहोरात्रि अज्ञ८ अर्बुद५ कोटि४ ब्रह्मणोमासः २५८२००००००० ब्रह्म
णोवर्षमानं ३११०४०००००००० महापद्म३ निरर्वर्व१ खर्व१० अर्बुद४ शतवर्षपरमायुः ३१
१०४०००००००००० समुद्र३ शंकु१ महापद्म१ खर्व४ अयंमहाकल्पः॥ ॥ग्रहर्क्षदेवदैत्या
दिसृजतोस्थ्वरावरं। तताद्रिवेदादिव्याष्टा४७४ शतघ्ना४७४०० वेधसोगताः॥१४॥ ब्रह्म
णः आदिसृष्टिकालः। वर्षकोटि१ लक्षा१० सहस्र६४ छिद्रद्वितीधृतुनगाग्निनंदयुग्मागचंद्र
द्रियकुंजराष्टौ तद्विका२४८८५१७२८४७१९८ वर्षसमूहएषशाकाष्टयुक्स्याद्विधियात
कालः॥१५॥ शालिवाहनशाके १४८१ प्रवर्त्तमाने ब्रह्मणोस्मिन्दिनेगतवर्षाणि शंकुस्म
हापद्म४ खर्व८८ अज्ञ५ कोटि१ लक्षा२८ सहस्र४८ शत५ वर्ष५८ शून्यानिचाष्टौ युगलत्रि
नागा अष्टौ तताद्रौ २४८८३२००००००० विधिवत्सरेभ्यः। शुद्धास्तु शेषं बालिबंधन ५
स्य श्रीवामनस्य प्रथिताद्धिसूपात्॥१८७२८४८६५८ श्लो१५ वामनावतारस्य गतवर्षाणि

[illegible] गताष्टरघुपतेः १२५९७५१

मावतारः। चत्वारिश्रन्यान्यथ सिंधुराग्निख
दोनरवानराणां समस्पर्शुद्धं सहरावणेना॥१॥
वर्षु५८ अथ रुद्रावतारः। श्रन्यत्रयाशु

नुग्रहेंदु१८६०३८०
गतवर्ष १२५९७५८ कोटि१ लक्षा
नुसमीरणाश्चिचंद्रो १२५९४००० नितोराघवराज्यकालः॥ गतानिवर्षाणिनवतिशे४६५८
र्षसंग्रामकालः कुरुपांडवानां॥१८॥ युधिष्ठिरकृतकलियुगानां गतावर्षाणि सहस्र४ शत६ व
र्ष५८ वर्त्तमान६० सयुद्धकालः। वामनगताष्टारघुपतेः प्राक् १२५९७५४ कृतसागरात्रिगुणोनि
ता ३०४४। विक्रमयातकालः॥१६१५१६ सएवबाणाग्निशशांकहीनः। १३५ स्याच्छाक १४९० कालः
किलशालिनाम्नः॥१७॥ वर्त्तमानशाक १४९१ इतिसंक्षेपतः सूर्यानुक्रमः॥ ॥अथराजवंशानु
क्रमः। ब्रह्मा मरीचस्त्वथ कश्यपश्चतस्माद्विवस्वश्च मनुस्ततोभूत्। इक्ष्वाकुरस्माच्च शशादना
मा तस्मात्ककुत्स्थः क्षितिपस्त्वनेना॥१॥ पृथुस्ततोभूदथ विष्टराश्वश्चाद्रिधौ युवनाश्वना
मा। श्रावस्तसंज्ञोष्टदश्वनामा थो धुंधुमारश्चततोदृढाश्वः॥२॥ हर्यश्वनामाथततो

निक्रमो बभूव राजाप्यथ संहताश्वः। प्रसेनजिद्वैयुवनाश्वनामा धात्रसंज्ञः पुरुकुत्ससंज्ञः॥३॥
ततो बभूव त्रसदस्युनामा राजाथ संभूत इति त्रिधन्वा। त्रय्यारुणश्चापि ततस्त्रिशंकुस्तस्माद्धरि
श्चंद्र इति प्रसिद्धः॥४॥ तदात्मजो रोहितनामधेयो बभूव राजा हरितोथ वंशुः। तस्यात्मजो भूद्विजयो
निधानो रुरुर्वृकोबाहुरिति क्रमेण॥५॥ तस्यात्मजो भूत्सगरः क्षितीशो जातस्ततो पंचजनोंशुमा
श्च। दिलीपनामाथ भगीरथोप्यृतोथनाभाग इति प्रसिद्धः॥६॥ ततोंबरीषोस्य सुतोथसिं
धुद्वीपो वताजिद्वृषपर्ण संज्ञः। सुदासनामास्य सुतोथ राजा कल्माषपादोप्यथ सर्वकर्मा॥७॥ अथा
नरण्यस्तनमित्रतो भूदुलीक्षिदस्तत्तनयो दिलीपः। तस्माद्ध्रुवस्तत्तनयश्चरस्त्वजो स्माद्दशादि
काथो रथनामधेयः॥८॥ तदात्मजो राम इति प्रसिद्धस्तस्मात्कुशस्तत्तनयो निधिश्च। बभूव तस्मा
न्निषधो नलो तो नभः क्षितीशस्त[illegible] [illegible]मधन्वा थ तत्पुत्रो देवानीकस्त्वहीनगुः।
सुधन्वा गदगंजद्ध[illegible] [illegible]ताश्वश्च पुष्पश्च ततो ध्रुवसिंधुसंज्ञकः। सुद
[illegible]क्ष्वंशप्रभवाः प्राधान्येन प्रकीर्तिताः। श्रुत्वा

६

सम्यगिमं वंशं प्रजावान्जायते नरः॥१२॥ इति सूर्यवंशानुक्रमः॥ ॥ अथ सोमवंशः। ब्रह्मा
त्मजो त्रिस्तनयो स्य सोमस्तनो बुधो तो पि पुरूरवाश्च। आयुश्च तस्मान्नहुषो ययातिः पुरुप्रवी
रो स्य सुतो मनस्युः॥१॥ तस्यात्मजो भूदनयः प्रदश्च ततः सुधन्वास्य सुतः सुबाहुः। रौद्राश्वना
मा थ रुवेयुरासीत्ततः क्षितीशो मतिनार नामा॥२॥ ततः सुरथ्यः क्षितिपस्ततस्मात्तंसुर्ध्वतना
मास्य नरतो स्य पुत्रः। ततो भरद्वाज इति प्रसिद्धस्तदात्मजो स्माद्भितथः सुहोत्रः॥३॥ बृहत्ततो
भूदजमीढसंज्ञ ऋष्यस्ततः संवरणः कुरुश्च। परीक्षितो तो जनमेजयश्च ततः क्षितीशो सुर
प्रसिद्धः॥४॥ विदूरथस्तत्तनयो तरुष्यस्तदात्मजो भूदथ भीमसेनः। प्रतीपनामाप्यथ शंत
नुश्च विचित्रवीर्यस्य सुतो थ पांडुः॥५॥ ततो जुनिस्तत्तनयो भिमन्युस्ततः परीक्षज्जनमेजयो
न्यो। एते क्षितीशाः किल सोमवंशे प्रकीर्तिताः कीर्तिविवर्द्धनाश्च॥६॥ यज्ञात्पुत्रो यदुत
स्तस्य वंशे कृष्णो महात्मा वसुदेवसूनुः। युधिष्ठिरो यः स च पांडुपुत्रो जातौ पृथिव्यां समकालमे
तौ॥७॥ वृष्णौ तववंशे स्मिन्द्वावेव च परीक्षतौ। भीमसेनास्त्रयो राजन्द्वौ चापि जनमेजयौ॥
॥८॥ द्वापरयुगांते राज्ञा युधिष्ठिरेण राज्यं कृतं वर्ष ३६ ततो भिमन्यु वर्ष० परिक्षितवर्ष६० ज

नमेजयवर्ष१२५शतानिकवर्ष१५५सहस्रानिकवर्ष३० नृतनववर्ष३० भीमराजवर्ष३६ चंद्रराजवर्ष२१ लघुरत्नादित्यवर्ष३ एवं चापोत्कटराज्यं ॥ इतिसोमवंशः ॥ अथ चौलिक्यवंशः श्रीपत्तने । मूलराजवर्ष३५ चामुंडवर्ष११ बल्लभद्रवर्ष१६ दुर्लभवर्ष१४ वृद्धभीमदेववर्ष२२ वृद्धकर्णदेववर्ष३० जयसिंहदेववर्ष४१ एमास६ कूरपालदेववर्ष३० जयपालवर्ष३० लघुमूलराजवर्ष२० लघुभीमदेववर्ष६४ त्रिभुवनपालवर्ष३० मास५ ॥ कर्णराजवर्ष२० वीसदेववर्ष३ अर्जुनदेववर्ष३० मास८ शारंगदेववर्ष२१ ग्रथलकर्णवर्ष८ मास८ ततोवर्ष१० पातशाहश्री अलावादीनात्म्लेछराज्यं ॥ इतिग्रहणलिखनानुक्रमेराजवंशानुकीर्तनं ॥ ॥ मांधाता धुंधुमारश्च कार्त्तवीर्यपुरूरवाः । भरतोजयपालश्च षडेते चक्रवर्त्तिनः ॥ ॥ १ ॥ मांधाता चक्रवर्त्ती कृतयुगसमये धुंधुमारोद्वितीयस्त्रेतायां भूमिभागे हरिरिव हरिश्चंद्रराजा बभूव । तस्माच्चंद्रैः सुतोभूत्तदनु च भवतः कार्त्तवीर्यश्चतस्मात्सोयं पृथ्वीधराणां गण इति गणितो धर्मकीर्त्तेश्च वृद्धौ ॥ २ ॥ पुत्राणां [illegible] रिनाभ एव निरवत्तद्दोणीभुजांराघवोदात्तृणां बलिरेव सत्पतयसां राजात्रिशंकोसुतः । शूराणामपि नागर्वि कृतधियां धर्मस्मि

दि

जोज्ञानिनां वैदेहः करुणावतां शिबिनृपः पार्थेमिहाधन्विनां ॥ ३ ॥ युधिरो विक्रमशालिवाहनोतनोनृपः स्याद्विजयाभिनंदनः । क्रमेण नागार्जुनभूपतेश्च किलः कलौ षट्शकुकारकान्तयाः ॥ ४ ॥ क्रमेण वेदाब्धिखवह्नयस्ततः शराग्निचंद्राः खखखाहिसूर्यः । वर्षाद्युर्तलक्षचतुष्टयं मर्त्तमही द्विनागाः शकवत्सराद्रमे ॥ ५ ॥ युधिष्ठिर ३०४४ विक्र १३५ शालि १८००० विजया १०० नागा ४००००० कल्कि २१ इतिग्रहणलिखनाधिकारे राजानुकीर्तनाधिकारः ॥ ॥ अथ पर्वभक्तिः । स्वस्तिश्री अमुकवर्षे शाके अमुकप्रवर्त्तमाने अमुकायनगते श्रीसूर्ये अमुकर्तौ महामांगल्यप्रद अमुकमासे अमुकपक्षे अमुकस्यां तिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थिते चंद्रे अमुकलग्ने दिवारात्रौ सूर्यस्य चंद्रस्य वा सर्वग्रहणं खंडग्रहणं वा खग्रासमाहितं वा यत्तोदितं यत्तास्तं वा यथासंभवं ग्रहणं भविष्यति । तस्य संस्था । तद्दिने सूर्योदियाऽतघटी अथवा सूर्यास्तात्रिगतघटी अथवा दिवाशेषघटी अथवा रात्रिशेषघटी यथागतसमये अमुकदिक्कः अंगुलव्यंगुलं अमुकदिक्मुख.

स्पर्शः अथ [illegible]न्घटी॰पल॰ यथागतसमयेतदा दिवारात्रौ वा अमुकसमये अमुकदिक्कः अं
गुलयंगुल अमुकदिक्सन्मुखं मध्यग्रहणं। मध्यग्रहणात् घटीपलं यथागततदा रात्रौ दिवा वा अ
मुकसमये अमुकदिक्कः यथागत अंगुलयंगुलैः अमुकदिक्सन्मुखो मोक्षः। अथ सर्वग्रासे खग्रा
सेचस्पर्शात् यथागतघटीपलं तदा दिनरात्रि अमुकसमये अमुकदिक्कः यथागत अंगुलयंगुलैः
अमुकदिक्सन्मीलनं। सन्मीलनात् यथागतघटीपलेषु तदा अमुकसमये अमुकदिक्कः यथा
गत अंगुलयंगुलैः अमुकदिक्मुखं मध्यग्रहणं। मध्यग्रहणात् यथागतघटीपलेषु तदा अमुक
समये अमुकदिक्कः यथागतांगुलयंगुलैः अमुकदिक्मुखं उन्मीलनं। अथ सन्मीलनात् यथागतघ
टीपलेषु तदा अमुकसमये अमुकदिक्कः यथागतांगुलयंगुलैः अमुकदिङ्मुखो मोक्षः। एवं य
थागतग्रासमोक्षांतरघटीपलपुण्यकालः। सूर्यग्रहणे ग्रस्तोदिते अमावास्यायां पश्चात् रा
त्रौ स्पर्शः प्रतिपदि दिवा मोक्षः ग्रस्तास्तमिते अमावास्यायां दिवा शेषसमये स्पर्शः। रात्रौ मोक्षः ८
चंद्रग्रहणे ग्रस्तोदिते पूर्णिमास्यां दिवा शेषे स्पर्शः। रात्रौ मोक्षः ग्रस्तास्ते पूर्णिमास्यां रात्रि

शेषे स्यात् स्पर्शः प्रतिपदि दिवा मोक्षः। सूर्यग्रहणं यावत्कालं दिवा दृश्यं चंद्रग्रहणं यावत्कालं रा
त्रौ दृश्यं तावत्पुण्यकालः। उक्तं च। दिवेंदुग्रहणं रात्रौ सूर्यपर्वनपुण्यदं। संधिस्थं तद्भवेत्पुण्यं यावद्दर्शन
गोचरे॥१॥ तथा शिष्यधीदेमहारात्रे लक्षोक्तत्वात्। द्वादशः सविदर्मज्ञांशकः पाटवेन तमसो नल
क्ष्यते। छंद्रितोपि खलु षोडशांशकः स्वच्छतां विदधतः कलाचतः॥२॥ तथा चोक्तं करणकंठीरवे के
शवार्कः। षोडशांशकपरांशिशिरांशो द्वादशांशकपरं च खरांशोः। पर्वसर्वजननेत्रनिरीक्ष्यं स्नानदा
नविधयो नधिकेपि॥३॥ भास्करः। अर्कांशकोर्कस्य विधोर्नपांशो नादेशनीयः किल खंडितोपि। अ
ल्पार्द्धसर्वग्रहणे शशीस्यात् धूम्रोसितो बल्लुरिनस्कलंकः॥४॥ एवं विदित्वा यथासंभवं लेखनीयं र
विबिंबं अंगुलयंगुलं चंद्रबिंबं अंगुलयंगुलं भूभा इति राहुबिंबं अंगुला दिछन्नं अंगुला
दि यथासंभवं खछन्नं अंगुलयंगुलं यथासंभव अमुकवर्णः अकरवांशे स्पर्शः अमुकखांशे मो
क्षः। पर्वेशो अमुकः। अमुकक्षमणं। दिनमानघटीपलं रात्रिमानघटीपलं। इति विदित्वा यथासंभ
वं पटे लेखनीयं॥ ॥ अथ पर्वेशादीनां फलानि लिख्यंते। अथ विद्वन् ग्रहणस्यास्य पर्वेशादी

[illegible] शाकंरविकुलंमासैयनिराघंविनाजितौ।तानैः४८शेषहृतेचाश्वैः७ शेषेपर्वेशानिर्णयः॥१॥
[illegible] विघ्नमासाद्यंग्रहवेदैर्विभाजितौ।४८ शेषस्यसप्तभिर्भक्ता शेषपर्वेशकास्मृताः॥१॥

[illegible] फलानिवै।संहितासारतोदृष्ट्वाकथ्यतेत्रमयाधुना॥१॥पर्वेशायनमासराशिनफलंकूर्मोपा
दिष्टंचयद्वेलामंडलवर्णदृष्टिगा।भतिजग्रस्तंग्रहाणांचयत्।यासोयांदिशिमाश्रितश्चतमसोय
त्सोदाकालोऽर्वतद्वयेहमरोषतश्चभवतः श्रएवंउसूर्यग्रहेचंद्रग्रहेवा॥२॥श्रएवंतियेप
टगतंग्रहणंरवींद्वोर्नदैश्चेउदृशिरप्युपपन्नमत्रातेत्राप्नुवंतिहरमस्तकसंगतगंगावगा
हनफलंविपुलांचलक्ष्मीं॥३॥पर्वेशायनमासराशिभनभांशैः षड्विधंकालतःस्पर्शग्रास
विमोक्षवर्णजनितंबिंबाच्चउर्द्धफलंरवेटालोकनजंग्रहग्रहभवंपक्षोभयस्थग्र[illegible]द्वैधंसति
संभवेचनियतंनैमित्तिकंवादिशेत्॥४॥अथपर्वेशाः।षण्मासोत्तरदृष्ट्यापर्वेशाःसप्तदेव
ताक्रमशः।ब्रह्मशशींद्रऋवेरावरुणाग्नियमाश्चविज्ञेयाः॥५॥अथपर्वेशफलानि।पर्वाधिपे
ब्रह्मणिसस्यसंपत्वृद्धिर्द्विजानांचतथापशूनां।क्षेमंप्रजानांधनधर्मवृद्धिर्नरोगतास्याद्द्वि
जयोमसर्च्चा॥६॥चंद्रेचपर्वाधिपतौप्रजानांक्षेमंचविद्वज्जनपोजनंस्यात्।अवर्षणंधान्यमरु
धताचविनाशमायांतितथौषधीनां॥७॥इंद्रोयदापर्वपतिस्तदानींपरस्परंस्याद्भृकुटीनृपाणां

धान्यानिनश्यंतिशरद्भवानिक्षेमंप्रजानांनभवेत्कदाचित्॥८॥यदाऋवेशोग्रहणाधिपःस्यात्
दार्थनाशोधनिनांजनानां।क्षेमंसुभक्षंचनिरामयत्वंलोकाश्चसर्वेभयवर्जिताःस्युः॥९॥जलेश्व
रेपर्वपतौसुभिक्षंप्रजास्तथोपद्रववर्जिताश्च।क्षेमंचसर्वत्रधनप्रवृद्धिःपीडांसमायांतिचरा
जपुत्राः॥१०॥पर्वाधिपोग्निःसुभमित्रनामाधनप्रवृद्धिस्त्वभयंक्षितौच।शुभाचवृष्टिर्नृपतीन्
हितस्थान्नीरोगतांचापिकरोतिसस्यं॥११॥यमोयदापर्वपतिस्तदास्यादवर्षणंभूपभयंप्रजो
नां।अन्नक्षयंचौरभयंक्षयंक्षयिणांसुनिक्षिप्तएवंमुनिभिःप्रदिष्टं॥१२॥पर्वेशरूपंग्रहणंयदास्यात्तदा
प्रजानामशुभप्रदंहि।अवृष्टिदंदुर्भरकप्रदंचकदापिकालांतरतोभवेत्तत्॥१३॥इतिग्र
हणलिखनक्रमेपर्वेशफलं॥ ॥अथवेलाफलं॥अतिवेलागतंपर्वफलसस्यविनाशनं।मध्य
छत्रंविनश्येतमध्यदेशउपप्लवः॥१॥वेलाहीनंयदापर्वशस्त्रकोपभयंकरं।स्त्रीणांचस्रवतेग
र्भोमहाराज्ञांउविग्रहः॥२॥दक्षमेपर्वणिनृपानिर्वैराविगतज्वराः।प्रजाश्चसुखिताःसर्वभिय
रोगविवर्जिताः॥३॥वैराहः।हीनाधिकेकालेफलंउक्तंसर्वदृष्टत्वात्।स्फुटगणितविदांकालःक्र

दाचिदपिनान्यथाभवति॥४॥कश्चिदुक्तं।यद्येकस्मिन्मासेग्रहणंरविसोमयोस्तदा क्षितिपाः
सबलक्षोभैःसंक्षयमायांत्यतिशस्त्रकोपश्च।एतत्तुकदाचिच्छंबनवशेनभवति।इतिएकमासे
ग्रहणद्वयफलं।अथग्रस्तास्तेग्रहोदितफलं।यावंतोंशान्ग्रसतेंदोरुदयत्यस्तामितिवा।तावंशो
नोंदृष्टिव्यास्तुतमएवविनाशयेत्॥१॥सूर्यस्याप्युपलक्षणंउदयेस्तमयेवापिसूर्यस्यग्र
हणंभवेत्।तदाभूपभयंविंद्यात्परचक्रस्यचागमं॥२॥उडुमध्यतिग्रहितश्चेदस्तंवायदि
गच्छति।शारदंतुतदासस्यंजातंजातंविपद्यते॥३॥ग्रैष्मेणतत्रजीवंतिनराफलफलेनवा।भय
उत्पद्यतेरोगैश्चतदासंपीड्यतेजगत्॥४॥इतिचंद्रः।ग्रस्तोदितोऽस्तगोवापियदासूर्येभिवेत्तदा
अन्यास्फीतान्जनपदान्वरिष्टंश्चनराधिपान्॥५॥इतिग्रस्तास्तग्रस्तोदितफलं।ग्रस्तोसमस्तो
यदिपापदृष्टोहिमांशुसूर्योमकरप्रदोषः।उन्निद्रदोक्षत्रियदुःखदोचभयंप्रजानांपरचक्रजंस्यात्
॥६॥इतिसर्वग्रासफलं॥ ॥अथखांशः।रात्रेर्दिनस्यचमितैस्तुरगैर्विभाज्यालब्धंभभोंशकमिति
स्फुगतेष्टभाग्यःखांशप्रमाणविहृताःफलसंख्यातारांशादिनेनिशिचतेनगसंख्यकास्युः॥ १०

अथखांशफलानि।आद्येनभोंशेग्रहणंरविद्वोगुणोधिकात्रैकृतिकांश्चविप्रान्।कृताशहृतांश्च
समस्तयज्ञान्प्रहारस्तथैवाश्रमिणोनिहंति॥१॥खांशेद्वितीयेग्रहणंरवींद्वोःऋषीबलानांबलनायका
नां।पाखंडिनांचापिवणिक्जनानांराजन्यकानांचविनाशकृत्स्यात्॥२॥खांशेतृतीयेग्रहणंरवींद्वोम्ले
छांश्चशूद्रानपिमंत्रिणश्च।कारूंश्चिहन्यादपिमध्यदेशंछत्रंचकांस्यंत्रपुकंमहर्घं॥३॥खांशेचतुर्थे
ग्रहणंयदास्यात्तदानिहन्यात्खलुमध्यदेशान्नृपांस्तथामंत्रिजनान्पशूंश्चधान्यंचसर्वंक्रुतेस
मर्घं॥४॥आकाशभागेयदिपंचमेस्यात्हिमांशुसूर्यग्रहणेतदानीं।वैश्यानमात्यांश्चपशूंश्चहन्या
दंतःपुरंवापितिलान्शिशूंश्च॥५॥षष्ठेनभोंशेग्रहणंरवींद्वोःस्त्रीरत्नशूद्रांश्चनिहंतिकन्याः।सु
वर्णकर्पूरकुंकुमानांमहर्घतास्यादपिनागवल्ल्याः॥६॥खांशेयदासप्तमकेरवींद्वोग्रहस्तदा
चोरविमर्दकर्त्ता।प्रत्यंतहीचापिगजाश्चवैश्यापीडाकरेवस्त्रविनाशकृच्च॥७॥एतत्खांशफलंप्रो
क्तंग्रहणेस्पर्शकालजं।यस्मिन्खांशेविमुक्तिःस्यात्तस्योक्तानांशिवंभवेत्॥इतिखांशफलानि
॥ ॥अथायनफलं।द्विजानांक्षत्रियाणांचगवांचपीडनंभवेत्।धान्यंमहर्घंषण्मासैर्ग्रहणंवो

त्रायने ॥१॥ दक्षिणायनगतेराहौ वैश्यशूद्रप्रमर्दनं महिषेकुंजरेपीडा त्रिभिर्मासैर्महद्भयं ॥२॥
इत्ययनफलं। अथमासफलं। कार्त्तिक्यामनलोपजीविमगधान्प्राच्याधिपान्कोशलान्क
लाषानथसूरसेनसहितान्काशींश्चसंतापयेत्। हन्याच्चाश्मकलिंगदेशनृपतिंसामात्य
नृत्यंतमोदष्टंक्षत्रियतापदेजनयतिक्षेमंसुभिक्षान्वितं ॥१॥ काश्मीरकान्कोशलकामपो
द्रान्मगांश्चहन्यादपरांतकांश्च। येसोमपास्तांश्चनिहंतिसौम्येसुवृष्टिक्षेमसुभिक्ष
कृच्च ॥२॥ पौषे द्विजक्षत्रजनोपरोधःससैधवाख्याःकुरुराविदेहाः। ध्वंसंव्रजंत्यत्रचमं
दहृष्टिर्नयंचविंद्याद्सुभिक्षयुक्तं ॥३॥ माघेतुमातृपितृभक्तिविशिष्टगोत्रान्स्वाध्या
यधर्मनिरतान्करिणस्तुरंगान्। वंगांगकाशिमनुजांश्चहुनोतिराजुदृष्टिंचकुरुतेज
नानुमतांकरोति ॥४॥ पीडांचकरंफाल्गुनमासिपर्ववंगान्समद्रावंतकमेकलानां। नृत्य
कस्यप्रवरांगनानांधनुष्करक्षत्रतपस्विनांच ॥५॥ चैत्र्यांतुचित्रकरलेखकगेयसक्तान्
नृपोपजीविनिगमहिरण्यपण्यान्। पौंड्रांध्रकैकयजनानथकाश्मकांश्चतापस्यशन्य

मरपोत्रविचित्रवर्षी ॥६॥ वैशाखमासग्रहणेविनाशमायांतिकर्षसितिलाःसमुद्राःइ
दंवाक्रयोधेयराकाःकलिंगाःसोपद्रवाःकिंतुसुभिक्षमस्मिन् ॥७॥ ज्येष्टेनरेंद्रद्विजराजप
न्यःसस्यानिवृष्टिश्चमहागणश्च। प्रध्वंसमायांतिमराश्चसौम्याःशालैःसमेताश्चनिषाद
संघाः ॥८॥ आषाढपर्वन्कदपानवज्रनदीप्रवाहान्फलमूलवात्तान्। गांधारकाश्मीरपुलिं
दनीनान्हतान्वदेर्मंडलवर्षमस्मिन् ॥९॥ काश्मीरान्सपुलिंदचीनयवनान्हन्यात्कुरुक्षेत्र
जान्गांधारानपिमध्यदेशसहितान्दृष्टोग्रहःश्रावणोकांबोजेकरभाश्चशारदमपित्य
क्त्वायथोक्तानिमानन्यत्रप्रचुरान्नदृष्टमनुजेद्वात्रीकरोत्यावृतं ॥१०॥ कलिंगवंगान्मगधा
न्सुराष्ट्रान्म्लेछान्सुखारान्दरदाश्मकांश्च। स्त्रीणांचगात्रानिसुरान्निहंतिसुभिक्षकृत्क्षा
ंपदेक्षपेतः ॥११॥ कांबोजनीनयवनान्सहशिल्पिकर्फिवाल्हीकसिंधुतटवासिजनांश्च
हन्यात्। आनर्त्तपौंड्रनिषजश्चतथाकिरातान्दृष्टोसुरोश्वयुजिनृरिसुभिक्षकृच्च ॥१२॥
तथाच। अश्वयुजमाघकार्त्तिकचाद्रपदेषागतःसुभिक्षकरः। राकुरवशोषमासेषसुभक्षरो

११

वृष्टिधान्यानां ॥१३॥ इति ग्रहणलिखनक्रमे मासफलानि ॥ ॥ अथ वारफलानि। अल्पं धान्या
ल्पमेघा भूरल्पक्षीराश्च धेनवः। कलिंगदेशपीडा च ग्रहणे रविवासरे ॥१॥ कर्पूरं मदिराश्चैव
विनश्यंति वरांगनाः। यमुनातटपीडा च ग्रहणे सोमवासरे ॥२॥ राजकुंजरपीडा च दुर्निष्क्रांत
स्करा भयं। अवंतीदेशपीडा च मंगले ग्रहणे यदि ॥३॥ पीतधातुमहर्घत्वं सारधान्यं विनश्यति।
कोशस्तेछत्रभंगश्च ग्रहणे बुधवासरे ॥४॥ सत्यशौचरता ये च चित्रवस्त्रप्रकारकाः। पीड्य
ते धुंधुदेशं च ग्रहणे गुरुवासरे ॥५॥ राज्ञामंतःपुरं चैव भृगुकच्छं विनाशयेत्। रजतं मौ
क्तिकं वस्त्रं ग्रहणे भृगुवासरे ॥६॥ सिंधुतीरे च सौराष्ट्रे महर्घं तस्करा भयं। राजमंत्रिविना
शश्च ग्रहणे मंदवासरे ॥७॥ इति ग्रहणलिखनक्रमे वारफलानि ॥ ॥ अथ नक्षत्रफलानि।
अश्वाश्वसेनापतिवैद्यसेवकास्तुरंगदक्षा वणिजश्च वारकाः। रूपान्विताश्वाश्वहरा फला
नि च प्रयांति पीडां ग्रहणे यदा श्विने ॥१॥ ये बंधताडनवधान्निरता मनुष्याः क्रूरास्तथा रु १२
धिरमांसभुजो पि ये स्युः। ये चापि नीचकुलजा अपि सत्वहीना स्तान्पीडयेत् वृषकणान् ग्रहणे

नरण्यां ॥२॥ ये सूत्रनाट्यकुशला अपि मंत्रदक्षा आकारिके द्विजपुरोहितकर्मकाराः। ये
वाग्निहोत्रनिरता अपि मेघदक्षास्तान्पीडयेद्ग्रहणकं यदि कृत्तिकायां ॥३॥ वाणिज्यभूपध
त्रिसुव्रतकर्षकाश्च तोयानशाकटिकगोवृषशीलमान्याः। भोगान्विताश्च धनखंडवरांगना
श्च पीडां प्रयांति यदि रोहिणिनेग्रहः स्यात् ॥४॥ वस्त्राज्जपुष्पफलरत्नविहंगमाश्च गांध
र्विकामुखसुगंधिवनेचराश्च। ये सोमपाश्च हरिणा अपि नेखहारास्तान्पीडयेद्भ्रमक
लान्ग्रहणं मृगर्क्षे ॥५॥ ये चौरशास्त्रवधबंधनभेदकारा मंत्रान्निवारकुशलाः परदा
रसक्ताः। वैतालकान्पतराः कटुकौषधानि हन्याद्ग्रहो कृशिशिनो यदि रौद्रभे स्यात् ॥६॥
ये सत्यशौचनिरता कुशला यशोन्विता रूपान्विताश्च धनिदानयुताश्च शिल्पिनः। मे
वारताश्च वणिजः शुभधान्यमंत्रिणः पीडां प्रयांति यदि दा ग्रहणं पुनर्वसौ ॥७॥ पुष्ये त्र
शालिकुवना निमंत्रिणो भूपाश्च गोधनमयवाश्च साधवः। ये यज्ञेष्टिसक्ता सलिला
पजीविनः पीडां प्रयांति ग्रहणे र्कसोमयोः ॥८॥ शिल्पानि पन्नगविषाणि च कंदमूलकी

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

ताः परस्वहरणनिरताश्च वैद्याः। धान्यानि चैव सगुडानि च नागवल्यो नाशं प्रयांति यदि पर्वणि
जंगमेस्यात् ॥९॥ पितृर्द्धगं यदि नवेद्ग्रहणं तदानीं नारीद्विषश्च पिठनक्रिरताश्च शूद्राः। शै
लाश्रयाफलमुजो वणिजश्च कोष्ठाः पीडां प्रयांति धनधान्ययुता रताश्च ॥१०॥ गंधर्वशिल्पि
नटपण्यकुमारिकाश्च कर्पासतैलनवणान्यनिसुंदराश्च। दुर्गाश्रयाश्च युवती फलमद्विजा
निप्राकृफाल्गुनीजनितपर्वणि यांति पीडां ॥११॥ ये शौचमार्द्दवयुता विनयान्विताश्च पाखंडि
दानशुभकर्मरता नराश्च। शास्त्रप्रवीणशुभधान्यमहाधनाढ्याः तान् पीडयेद्ग्रहणमुत्तरफ
ल्गुनीषु ॥१२॥ तेजोयुताश्च वणिजो रथिकुंजराश्च पण्यानि शिल्पतुषधान्यगजाधिरोहाः
चौराश्च शास्त्रकुशलाः परिपीडिताः स्युर्हस्तेयदा ग्रहणमिंदुदिनयोस्तदानीं ॥१३॥ शाला
क्यचित्रमणिभूषणरागलेख्यगंधादियुक्तिकुशलाः प्रपितंबवायाः। तान् पीडयेद्ग्रहणं नरो
विदराजधान्यो चित्राख्यभे यदि नवेद्ग्रहणं रवींद्वोः ॥१४॥ धान्यानि वानबकुलानि रकगा
मृगाश्च ये तापसाश्च लघुसत्वतुरंगमाश्च। ये चापि पुण्यकुशला चलसौहृदाश्च स्वा